अङ्क-२६ वेदविद्या
जुलाई-दिसम्बर २०१५ ISSN-2230-8962

# वेदेषु सामवेदः

**वे.मू. कृपासिन्धु पण्डा**

भारतीयदर्शनस्य धर्मस्य च जीवनं वेदाः एव सन्ति। वेदाः न केवलं भारतीयैरपि तु वैदेशिकैः विद्वद्भिरपि श्रद्धयाऽवलोकिताः सन्ति। वेदास्त्व-स्माकं श्रेय- प्रेयप्रभृतीनामपि साधनमस्ति। वेदेषु ज्ञान-विज्ञान-धर्म-दर्शन-सदाचार-संस्कृति-नैदिक-सामाजिक-राजनैतिकप्रभृतीनां जीवनोपयोगिविषयाणां सन्निवेशोऽस्ति। **"विद्यन्ते धर्मादयः पुरुषार्थाः यैस्ते वेदाः"** इति प्रातिशाख्यम्। **"इष्टप्राप्त्यनिष्ट-परिहायोरलौकिकमुपायं यो वेदयति सः वेदः"** इति भाष्यभूमिकायामुक्तम्। सामवेस्य सहस्त्रभेदभिन्नत्वे पूर्वाचार्याणां सिद्धेऽपि इदानीमुपलभ्यमानास्तिस्त्र एव शाखाः, कौथुमी, जैमिनीया, राणायनीया चेति। तत्र दक्षिणदेशे द्राविडदेशेषु शाखात्रयमुप-लभ्यते, तत्राधिकं कौथुमी, ततोऽल्पं राणायनीया, अल्पतरं च जैमिनीया। गुर्जरदेशेषु कौथुम्येव प्रचलिता, महाराष्ट्रेदेशेषु राणायनीया।

सामवेदस्य प्रशंसा अनेकेषु ग्रन्थेषु तुदिरता अस्ति। तामेव सर्वेषां जीवानां प्राणाः, तामेव स्वर्गलोकस्योत्पादकं, सप्तभिः स्वरैरेव आब्रह्मस्तम्भपर्यन्तं जगतां सृष्टिः, यः सामं जानाति सर्वं जानातीत्यर्थः प्रशंसपरः श्रुतयः स्मृतयश्च असंखेयाः मुखरिताः विद्यन्ते। इदानिं सामवेदस्योऽर्थोत्पतिः कथमिति विचार्यते। **"साम"** शब्चस्तु रूढोऽस्ति। अस्यार्थः मानमथवा गीतिरस्ति। अस्मिन् सन्दर्भे जैमिनिनाऽप्युक्तम् - **"गीतिषु सामाख्या"**[१]। गायत्र्यादिषु सर्वेषु छन्दः सु सामगान-मस्ति। **"सा च अमश्चेति साम्ना सामत्वं"** इति शतपथब्राह्मणम्। **"सैव नाम ऋग्वासीत् अमोनामो साम"** इति ऐत्तरीयब्राह्मणम्। सामशब्दस्य प्रयोगः द्वयोरर्थयोरेव मिलति। ऋग्मन्त्राणामुपरि गायनमेव वस्तुतः सामशब्दस्य वाच्योऽस्ति। किञ्च ऋग्वमन्त्रेभ्योऽपि सामशब्दस्य प्रयोगो मिलति। पूर्वमेव निगदितं सामसंहितायाः सङ्कलनमुद्गातृनामके ऋत्विजे कृतमस्ति। उद्गाता अयं देवतायाः स्तुतिपरक-मन्त्रानवश्यकानुसारेण विविधस्वरेषु गायति। अतः सामस्याधारः ऋग्मन्त्रा एव भवन्ति, इति निश्चित-मिदमस्ति[२]। ऋक्सामयोः प्रगाढमिदं पारस्परिकसम्चन्धं सूचयितु-मुभयोर्मध्ये दाम्पत्यभावस्याऽपि कल्पना वर्ततेऽत्र। पति। सन्तनोत्पादनाय पत्न्या आह्वानं कुर्वन् कथयति - **"सामरूपोऽहं पतिरस्ति त्वञ्च ऋग्रूपा पत्नी असि। अहमाकाशोऽस्मि त्वञ्च पृथ्व्यसि"**। अतः आगच्छ। आवयोर्मिलित्वा प्रजानामुत्पादनं कुर्वः **"अमोऽहमस्मि सा त्वम्, सामाहमस्ति ऋक् त्वम्, द्यौरहं पृथिवी त्वम्, तामिह**

---

१ जै.सू. २/१/३६
२ ऋषि अध्यूढं साम-छा.उ. १/६/१

**सम्भवाव प्रजामजनवावहै"**[३] । सामशब्दस्यैकाऽतीव सुष्ठु निरुक्तिः ब्रुहदारण्यकोपनिषदि वर्त्तते - **"सा च अमचेति तत्साम्नः सामत्वम्"**[४] । सा शब्दस्यर्थो भवति ऋक् तथा अम शब्चस्यार्थोऽस्ति गन्धारादयः स्वाराः। अतः सामशब्चस्य व्युत्पतिलभ्यार्थऽभवेत् - **"ऋचा सह सम्बद्धस्वरप्रधानगायनम् - तया सह सम्बद्धः अम् नामस्वरः यत्र वर्त्तते तत्साम"**। यज्ञे, तथा ईश्वरोपासनायां भक्तिरसे निमग्नैर्जनैर्ये मन्त्राः ऋत्विजः गीयन्ते ते सामपदवाच्याः। यासामृचामुपरि सामगानं भवति ता ऋचः वेदज्ञाः **"सामयोनिः"** नाम्ना जानन्ति। अत्र स्मरणीयमस्ति यदिदं सामसंहिताया वर्णनमस्ति। इदं तासां सामऋचां सङ्ग्रहमेवाऽस्ति अर्थात् सामसंहितायां केवलं सामोपयोगिनां मन्त्राणां सङ्कलनमेवास्ति, तेषां गायनानां नास्ति यत्सामवेदस्य मुख्यं वाच्यमस्ति। आभ्यन्तरप्रयत्नजन्यो वागिन्द्रियव्यापारविशेषो गानम्।

अनेकप्रयोजनसम्पादनहेतोः वेदेषु स्वराणामुपयोवो विधीयते। प्रथमं प्रयोजनं तु तेषां वेदपाठपरिरक्षणामस्ति, द्वितीयं प्रयोजमिदं यत् नाम्ना जानन्ति। वैस्तत्तत्पद-गतोऽर्थो निर्धार्यते। सामवेदे - **"षड्जश्च ऋषभश्चैव गान्धारो मध्यमस्तथा। पञ्चमो धैवतश्चैव निषादः सप्तमस्वरः"**[५] इति सप्तभिः स्वरैः गानं क्रियन्ते। एतदतिरिक्त्य वहवः स्वराः सन्ति, तेषां नामानिकृष्टः, प्रथमः, द्वितीयः, तृतीयः, चतुर्थः, मन्द्रः, अतिस्वार्यश्च। पुनरपि द्वौ अधिस्वरौ कर्षणं, सप्रसारणञ्च। कर्षणस्य पञ्चस्वराः सन्ति तेषां नामानि - आद्वितीय-कर्षणं, आतृतीयकर्षणं, आचतुर्थकर्षणं, आमन्द्रकर्षणं, मन्द्रश्चा-तिस्वार्य-कर्षणम्। सम्प्रसारणस्यापि त्रिधा विभज्यते, तेषां नामानि - प्रथमाधि-संप्रसारणं, द्वितीयाधिसंप्रसारणं, तृतीयाधिसंप्रसारणम्। प्रथमस्य सप्ताबान्तरस्वराः विद्यन्ते तेषां नामानि - स्वैप्रस्वरः, अभिनितः, तैरव्यञ्जनः, कन्तः, प्रैंखः, विनतः, नमतश्चेति। यदि सामसंहितायाः मन्त्राः ऋग्वेदादेव संगृहिताश्चेत् तर्हि तेषां रूपमेव नास्ति प्रत्युत तेषां स्वरनिर्देशोऽपि तद्वदेव भवितव्यम्। ऋग्वेदे उदात्तानुदातस्वरिताः स्वरा मिलति, किञ्च सामवेदे तेषां निर्देशः १, २ तथा ३ अङ्कैः कृतः। एते स्वराः गन्त्रगानेषु कण्ठेन हस्ते अङ्गुलीनां मध्यमपर्वोपरि अङ्गुष्ठस्य स्पर्शं कुर्वन् तथा अङ्गुलिमाध्यमेन च प्रदर्शयन्ते।

सामगानेष्वेता एव सप्ताङ्कास्तततस्वराणां स्वरूपं सूचयन्ति। साममन्त्रेषूपरि प्रदत्ताङ्कानां व्यवस्था विभिन्न प्रकाराका एवेति। सामयोनि मन्त्रान् सामगानेषु परिवर्तनेनेकविधानि सङ्गीतानुकूल-परिवर्त्तनानि च भवन्ति। मानसमये मन्त्राणां स्चरूपपरिवर्त्तनं भवति, तत्राष्टौ कारणानि- विकारः, विश्लेषः, विकर्षणम्, विरामः, अभ्यासः, लोपः, आगमः, स्तोमश्चेति। विद्यमानस्य वर्णस्य स्थाने वर्णान्तरोच्चारणं विकारः, सन्धिविच्छेदो विश्लेषः, ह्रस्वस्थाने दीर्घस्य, दीर्घस्थाने प्लुतस्योच्चारणं विकर्षणम्, विश्रामो विरामः, द्विस्त्रिरिच्चारणमभ्यासः, वर्णस्यानुच्चारणं लोपः, अधिकवर्णस्याच्चारणमागमः, व्यर्थस्थानन्वितस्य शब्दस्योच्चारणं स्तोमः। **"ऋचौ यदधिकं किञ्चित् द्विरुक्तं वाऽपि दृश्यते। स्तोमत्वं**

---

[३] वृह. उ. ६/५/२०, अ.वे. १४/२/७, ऐ.ब्रा. ८/२७

[४] वृह. उ. १/२/२२

[५] ना.शि. २-४

**तस्य मन्यन्ते क्रमशः शास्त्र चिन्तकाः॥"**[६] स च स्तोमस्त्रिविधः - वर्णस्तोमः, पदस्तोमः, वाक्यस्तोमश्चेति। तत्र वर्णस्तोमः इकारादि, पदस्तोमो हाई, हाउ आदि। वाक्यस्तोमो नवविधिः - अशस्ति, स्तुति, संस्थानम्, प्रलयः, परिदेवनम्, प्रैषः, अन्वेषणम्, सृष्टिः, आख्यानमिति। एतेषां लक्षणादिकं स्तोमग्रन्थादवगतम्। उक्तैः कारणैः परिवर्त्तितो मन्त्र समुदाय गानम्। गानसंहिता - गेय, रुह, ऊह्य, आरण्यकभेदैश्चतुर्द्धा।

आचार्यशंकरः स्ववेदान्तभाष्यस्यानेकस्थलेषु अस्य चर्चां कृतवानस्ति। चर्चेयमस्य गौरवस्य महत्त्वस्य च सूचिकास्ति। सामवेदे अष्टौ ब्राह्मणानि - ताण्ड्य-षड्विंश-मन्त्र-दैवत-आर्षेय-सामविधान-संहितोपनिषद्-वंशजैमिनीयानामभिः प्रसिद्धानि। तत्र सर्वापेक्षया ताण्ड्यब्राह्मणमेव महत्। अत एव तन्महाब्राह्मणमित्यपि कथ्यते। पौढब्राह्मणम्, पञ्चविंशब्राह्मणमित्यप्यस्य नाम। शस्त्र-स्तोत्रयोर्मध्येऽन्तरं भवति। शस्त्रस्य लक्षणमस्ति - **"अप्रणीतमन्त्रसाध्या स्तुतिः शस्त्रम्"**। अर्थात् गायनं विना मन्त्रेण सम्पादिता स्तुतिः। शस्त्रं ऋग्वेदे भवति स्तोत्रं तु सामवेदे। स्तोत्रस्य स्पष्टार्थो भवति - **"प्रगीतमन्त्रासाध्यास्तुतिः स्तोत्रम्"**। स्तोत्रमपि स्तुल्याः एकं प्रकारान्तरं भवति। स्तोमस्य यागेषु भवति। अस्य विशेषवर्णनं सामवेदस्य ताण्ड्यब्राह्मणेषु कृतमस्ति। पञ्चविंशतिकाण्डात्मकः विपुलकायः ताण्ड्यब्राह्मणग्रन्थः अस्यैव शाखाया वर्त्तते।

यज्ञेषु औद्गातृगणस्य चतुर्णामृत्विजां कार्यकलापेषु क्वापि भिन्नता क्वचिच्च सहकारिताऽपि भवति। अस्य विधानं श्रौतसूत्रेणावगन्तुं शक्यते। सामवेदे १८९४ मन्त्राः सन्ति, तत्र भागद्वयछन्दः संहिता, उत्तरसंहिता चेति। पूर्वार्चिकमुत्तरार्चिकमित्यप्यभिधानं तयोः। पूर्वार्चिके षट्, उत्तरार्चिके त्रयः प्रपाठकाः। पूर्वार्चिकस्योत्तरार्चिके नैतदेव सम्बन्धमस्ति यदुरार्चिके यत्प्रगाथः किंवा ऋचां सूक्तानि सन्ति तास्वधिकतराः प्राक् ऋचः पूर्वार्चिके पठिताः सन्ति। पूर्वार्चिके नानाविधसाम्नां योनिभूता ऋचः पठिताः सन्ति, तथोत्तरार्चिके सूक्ते पूर्वार्चिकान्तर्गतयोनिभूता ऋक् पूर्ववर्तिनौ भवति तथापरास्तूत्तरकालिको ऋचः भवन्ति। पूर्वार्चिकस्योत्तरार्चिकेन सह सम्बन्धं नित्वा पाश्चात्यपण्डितास्तु पर्याप्तपर्यालोचनं कृतवन्तः। सामविधानब्राह्मणे उत्तरार्चिकस्य मन्त्राणामुद्धरणं कुत्राऽपि न दृश्यते। अथर्व-परिशिष्ट (४६/३/६) स्यानुसारेण पूर्वार्चिकस्यपान्ता ऋगेव सामवेदस्यान्तिमा ऋगस्ति (सा.सं ५/७)। उत्तरार्चिकस्तु निश्चितरूपेण यज्ञोपयोगिनामृचामवान्तरकालिकः सङ्ग्रह एवास्ति। एतावदेव नास्ति, प्रत्युत गानग्रन्थान् ताण्डब्राह्मणात्पश्चात्, लाट्यायनश्रौतसूत्रात्पश्चात् आर्षेयकल्पसूत्रात्, पुष्यसूत्रादपि पश्चाद्वर्तिनी रचनाज्ञातुमाग्रहं कुर्वन्ति। आधुनिकपरिशीलनेन ज्ञातो भवति यत्पूर्वार्चिकः उत्तरार्चिकापेक्षया प्राचिनतरः सिद्धो भवति।

चतुसृष्वपि संहितासु सामसंहिता परमगौरवशालिनी वर्त्तते। **"सामानि यो वेति स वेदतत्त्वम्"** इत्येतद् वहद्देवतायाः कथनं तन्महिमानमुच्चैर्गायति। गीतायां भगवान् कृष्ण आह - **वेदानां**

---

[६] स्तोमानुसंहारपरि. १.१६

**सामवेदोऽस्मि।** वेदस्यास्योद्देश्यमस्ति गानपूर्वकमुपासनम्। ऋग्वेदे अथर्ववेदेऽपि च सामवेदस्य प्रशंसा मिलति। एकस्मिन् मन्त्रे स्पष्टोक्तिरियमस्ति - **"यो जागार तमृचः कामयन्त, यो जागार तमु सामानि यन्ति"।** [७] अपरस्मिन् मन्त्रे खग-कुल-कलरव-इव सामगायनं मधुरं भवतीति कथितम् - उद्गातेव शकुले साम गायसि (२/४३/२)। अङ्गिरा-ऋषेः सामस्योल्लेखः अनेकशो मिलति- **"अङ्गिरसां सामभिः स्तूयमानाः"** [८]। अपरस्मिन् मन्त्रे कर्मणः साधनभूतस्य ऋग्वेदस्य सामवेदस्य च स्तुतेः विधानमस्ति - **"ऋचं साम यजामहे यासां कर्माणी कुर्वते"** [९] एतदतिरिक्तः सामवेदस्य विभिन्नमभिधानं प्राचीनवैदीकसाहित्ये समुपलब्धो भवति, येनास्य सामवेदस्य प्राचीनता असन्दिग्धरूपेण सिद्धो भवति। ऋग्वेदे वैरूप-वृहत्-रैवत-गायत्र-भद्रादीनां साम्नानाम् अभिधानं मिलति। यजुर्वेदे रथन्तर-वैराज-वैखानस-वामदेव्य-शाक्कर-रैवत-अभीवर्तादीनामुल्लेखो मिलति। एतरेयब्राह्मणे नौधस-रौरव-यौधाजय-अग्निष्टोमीयप्रभृतीनां विशिष्टसामनाम् अभिधानस्य निर्देशो मिलति। अनेन प्रतीतो भवति यत् सामगायनं प्राचीनकालादेव समायाति। ऋग्वेदस्यपि समये एतेषां विशिष्टगायनानाम् अस्तित्वं, वैशिष्ट्यं, वेदेषु सामवेदः स्पष्टरूपेण सिद्धो भवति।

**सामवेदजलाकीर्णं छन्दः कल्लोलसङ्कुलम्। तत्रग्रहान्वितं वन्दे सामवेद महार्णवम्॥**
**॥ ॐ शान्तिः, शान्तिः, शान्तिः ॥**

**वे.मू. कृपासिन्धु पण्डा**
एम. ए. (संस्कृत), आचार्य (वेद),
शु.य. (क्रमान्ती),
अध्यक्षः,
श्री दैव्यशुक्ल यजुर्वेदकाण्व वेद पाठशाला,
दिव्यसिंहपुर पोस्ट रायगुरपुर, व्हाया निराकारपुर
जिला पुरी ओडिशा - 752019

[७] ऋ.वे. ५/४४/१४।
[८] ऋ.वे. १/१०७/२।
[९] अ.वे. ७/५४/१।